(अल्पशच्छाय: ।) इति हारावली । २१६ ॥

छात्रदर्शनं, क्ली, (छात्रं वरटीकृत्वसम्भूतं मधु तदिव दृश्यते इति । दृश+कर्म्मणि ल्युट् ।) हैयङ्गवीनम् । इति शब्दचन्द्रिका ॥ (छात्राणां दर्शनम् ।) शिष्यावलोकनञ्च ॥

छादं क्ली, (छाद्यते गृहमनेनेति । छद+णिच्+करणे घञ् । छादयतीति । छद्+णिच्+अच् वा ।) पटलम् । इति जटाधर: ॥ छात इति चाल इति च भाषा ॥

छादनं, क्ली, (छद कि संवृतौ+णिच्+करणे ल्युट् ।) छदनम् । अन्तर्द्धानम् । (कर्त्तरि ल्यु: ।) पत्रम् । इत्यमरटीकायां भरत: ॥ (भावे ल्युट् ।) आच्छादनम् । (यथा, हरिवंशे । ६१ । २५ ।
"नियोगपाशैरासक्तैर्गर्गरीस्तम्भ सङ्कसु ।
छादनाथ प्रकीर्णैश्च कण्टकैस्तृणसङ्कटे: ॥")

छादन:, पुं, (छादयति आवृणोति पत्रादिभिरिति । छादि+ल्यु: ।) नीलाम्लानवृक्ष: । इति राजनिर्घण्ट: ॥

छादित:, त्रि, (छाद्यते स्मेति । छद+"वा दान्त-शान्तेति ।" ७।२।२७ । इडागमात् साधु: ।) छन्न: । इति जटाधर: ॥ आच्छादित: । यथा,
"घनतरघनवृन्दैश्छादितौ पुष्पवन्तौ ॥"
इत्युद्भट: ॥

छान्दस:, पुं, (छन्दो वेदं अधीते वेत्ति वा । छन्दस्+"तदधीते तद्वेद ।" ४ । २ । ५९ । इत्यण् ।) वेदाध्येता । इत्यमर: । २।७।६ ॥ (छन्द एवेति । स्वार्थे अण् । वेद: ।
"मन्ये त्वां विषये वाचां स्नातमन्यत्र छान्दसात् ॥"
इति भागवते । १ । ४ । १३ ॥
त्रि, छन्दसो व्याख्यातस्तत्र भव: । "छन्दसो यदणौ ।" ४ । ३ । ७१ । इत्यण् । वेदभव: ॥ छन्दसोऽयम् । "तस्येदम् ।" इत्यण् । वेदसम्बन्धी । स्त्रियान्तु ङीप् । यथा, हरिवंशे । २१५ । ७ ।
"छान्दसीभिरुदाराभि: श्रुतिभि: समलङ्कृत: ॥")

छान्दोग्यं, क्ली, (छन्दोगानां धर्म्म: आम्नायो वा । छन्दोग+"छन्दोगौक्थिकयाज्ञिकबह्वृच नटाञ्ञ्य: ।" ४ । ३ । १२९ । इति ञ्य: ।) सामवेदोपनिषत् । इति वैदिकसम्प्रदाय: ॥ (यथा, मौक्तिकोपनिषदि १ अध्याये ।
"ऐतरेयञ्च छान्दोग्यं बृहदारण्यकन्तथा ॥")

छाया, स्त्री, (छ्यति छिनत्ति सूर्य्यादे: प्रकाशं नाशयतीत्यर्थ: । छो+"माच्छाससिसूभ्यो य: ।" उणां । ४ । १०९ । इति यस्तताप् च ।) रौद्रशून्यम् । तत्पर्य्याय: । भावानुगा २ स्रामा ३ अतप: ४ भीरु: ५ अनातप: ६ आभीति: ७ तपाभाव: ८ भावालीना ९ । अस्या गुणा: । मधुरत्वम् । शीतलत्वम् । दाहश्रमहरत्वञ्च । इति राजनिर्घण्ट: ॥ घर्म्मनाशित्वम् । मेघच्छायागुण: । भ्रमभ्रमकृच्छ्रा-सन्तापनाशित्वम् । इति राजवल्लभ: ॥ * ॥ छायाविशेषे दोषो यथा,—
"दीपखट्वातनुच्छाया छिन्नकेशनखादिकम् ।
अजमार्ज्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ॥"
इति कर्म्मलोचनम् ॥ * ॥
(लक्षणभेदेनास्या अरिष्टकारित्वं यथा,—
"ज्योत्स्नायामातपे दीपे सलिलादर्शयोरपि ।
अङ्गेषु विकृता यस्य छायाप्रेतस्तथैव स: ॥
छिन्ना भिन्नाकुला च्छाया हीना वाप्यधिकापि वा ।
नष्टा तन्वी द्विधा च्छाया विशिरा विकृता च या ॥
एताश्चान्याश्च या: काश्चित् प्रतिच्छाया विगर्हिता: ।
सर्व्वा मुमूर्षतां ज्ञेया नचेल्लक्ष्यनिमित्तजा: ॥
संस्थानेन प्रमाणेन वर्णेन प्रभया तथा ।
छाया विवर्त्तते यस्य स्वप्नेऽपि प्रेत एव स: ॥"
"खादीनां पञ्चपञ्चानां छाया विविधलक्षणा: ।
नाभसी निर्म्मला नीला सस्नेहा सप्रभेव च ॥
रूक्षा श्यावारुणा या तु वायवी सा हतप्रभा ।
विशुद्धरक्तात्वाग्नेयी दीप्ताभा दर्शनप्रिया ॥
शुद्धवैदूर्य्यविमला सुस्निग्धा चाम्भसी मता ।
स्थिरा स्निग्धा घना श्लक्ष्णा श्यामा श्वेता च पार्थिवी ॥
वायवी गर्हिता त्वासां चतस्र: स्यु: सुखोदया: ।
वायवी तु विनाशाय क्लेशाय महतेऽपि वा ॥
स्यात्तैजसी प्रभा सर्व्वा सा तु सप्तविधा स्मृता ।
रक्ता पीता सिता श्यावा हरिता पाण्डुरा सिता ॥
तासां या: स्युर्विकासिन्य: स्निग्धाश्च विपुलाश्च या: ।
ता: शुभा रूक्षमलिना: संक्षिप्ताश्चाशुभोदया: ॥
वर्णमाक्रामति च्छाया भास्तु वर्णप्रकाशिनी ।
आसन्ना लक्ष्यते च्छाया भा: प्रकृष्टा प्रकाशते ॥
नाच्छायो नाप्रभ: कश्चिद्विशेषाश्चिह्नयन्ति तु ।
नृणां शुभाशुभोत्पत्तिं काले च्छाया: प्रभाश्रिता: ॥"
इतीन्द्रियस्थाने सप्तमेऽध्याये चरकेणोक्तम् ॥)
प्रतिबिम्बम् । (यथा, याज्ञवल्क्ये । ३ । २७९ ।
"मयि तेज इति च्छायां स्वां दृष्ट्वाम्बुगतां जपेत् ॥")
सूर्य्यपत्नी । सा संज्ञाप्रतिकृति: । (यथा मत्स्यपुराणे । ११ । ५ ।
"नारीमुत्पादयामास स्वशरीरादनिन्दिताम् ।
त्वाष्ट्रीस्वरूपेण नाम्ना छायेति भामिनी तदा ॥")
पालनम् । उत्कोच: । कान्ति: । (यथा, मेघदूते । ४१ ।
"वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धु:
पाण्डुच्छायातटरुहतरुभ्रंशिभि: शीर्णपर्णै: ॥")
सच्छोभा । पङ्क्ति: । इति मेदिनी । ये, २३ ॥ कात्यायनी । इति शब्दरत्नावली ॥ तम: । इति हेमचन्द्र: ॥ साहश्यम् । यथा,—
"अङ्गादङ्गात् संभवसि हृदयादधिजायसे ।
वस्त्रादिभिरलङ्कृत्य पुत्रच्छायावहं सुतम् ॥
पुत्रच्छाया पुत्रसादृश्यम् ।" इति दत्तकचन्द्रिका ॥ (क्रमविंशत्यक्षरवृत्तिविशेष: । इति छन्दोमञ्जरी ॥ अस्य लक्षणादिकं छन्द:शब्दे द्रष्टव्यम् ॥)

छायाकर:, त्रि, (करोतीति । कृ+अच् । छायाया: कर: । छायां करोतीति वा ।) छत्रधार: । इति हेमचन्द्र: ॥ छातावरदार इति भाषा ॥

छायातनय:, पुं, (छायाया: सूर्य्यपत्न्यास्तनय: पुत्र: ।) शनि: । इति हलायुध: ॥

छायातरु:, पुं, (छायाप्रद: छायाप्रधानो वा तरु: । शाकपार्थिववत् मध्यपदलोपिसमास: ।) स्थिरच्छायवृक्ष: । इति त्रिकाण्डशेष: ॥ (अस्य लक्षणं यदाह कश्चित् ।
"पूर्व्वाह्णे च पराह्णे च तलं यस्य न मुञ्चति ।
अत्यन्तशीतलच्छाया स च्छायातरुरुच्यते ॥"
यथा, मेघदूते । १ ।
"कश्चित् कान्ताविरहगुरुणा स्वाधिकारप्रमत्त:
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तु: ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥")

छायात्मज:, पुं, (छायाया: सूर्य्यपत्न्या आत्मजस्तनय: ।) शनिग्रह: । इति त्रिकाण्डशेष: ॥

छायापथ:, पुं, (छाया मेघच्छाया तदभ्यन्तर: पन्था: । छायायुक्त: पन्था इत्येके ।) देवपथ: । आकाश: । इति त्रिकाण्डशेष: ॥

छायापुरुष:, पुं, (छायायां दृष्ट: पुरुष: पुरुषाकृतिविशेष: ।) आकाशे दृष्ट: स्वीयच्छायारूपपुरुष: । यथा,—
श्रीदेव्युवाच ।
"भगवन् ! देवदेवेश ! सर्व्वागमविशारद ! ।
नराणां पापिनां लोके पापनिर्म्मोचनं कथम् ॥
कालज्ञानं कथं वा स्यात् सूक्ष्मोपायेन तद्वद ।
श्रुतानि साधनानीश ! मयानेकानि भूरिश: ॥
तथापि तानि मनुजैरशक्यान्यल्पबुद्धिभि: ।
प्रायेण मनुजा लोके कलौ स्वल्पायुषो ध्रुवम् ॥
अनेकवर्षसाध्येऽस्मिन् योगाभ्यासे ह्यशक्तय: ॥
शिव उवाच ।
साधु देवि ! त्वया पृष्टं लोकानां हितकाम्यया ।
तादृशं साधनं वक्ष्ये सर्व्वसाधारणं लघु ॥
गोपनीयं प्रयत्नेन न वाच्यं वै कथञ्चन ।
सिद्धाय भक्तियुक्ताय सेवकाय सुचेतसे ॥
पापिने क्रूरचेष्टाय भक्तिहीनाय भामिनि ! ।
न वदेद्यदि वा मोहात् वदेत् सिद्धिं न विन्दति ॥
तस्मात् परीक्ष्य वक्तव्यं शिष्याय ज्ञानिने शिवे ! ।
स्वच्छायापुरुषं पश्येद्गगने शुद्धमानस: ॥
तस्यावलोकनात् सद्य: पापराशिर्व्विनश्यति ।
महापातकसङ्घैश्च तत्समैश्चोपपातकै: ॥
विमुच्यते चणार्द्धेन तूलराशिर्यथानलात् ।
कालज्ञानञ्च षण्मासे तस्मिन् दृष्टे भवेद्ध्रुवम् ॥
देव्युवाच ।
अतश्छायां कथं पश्येद्गगने भूतलस्थिताम् ।
षण्मासे कालज्ञानञ्च तस्मिन् दृष्टे कथं भवेत् ॥
शिव उवाच ।
निरभ्रे गगने देवि ! यदा भवति निर्म्मलम् ।
तदा छायासुखो भूत्वा निश्चलं प्रयतो धिया ॥